स्वरूपेण व्यवस्था तु सर्वज्ञेनैव नान्यथा।
आज्ञाकृतिर्निर्भयत्वं नैवाभ्यामुच्यते स्फुटम् ॥ ९ ॥
जीवस्य यादृशं रूपं तेन नित्यं व्यवस्थितिः।
यदौपनिषदं ज्ञानं प्रमया नेह तत्कथा ॥१०॥
व्यवस्थाश्रयसिद्धौ तु न तृतीयेऽपि सूचितम्।
द्वितीयेऽपि स्फुटं नोक्तं केवलौपनिषत्त्वतः ॥११॥
अतः सर्वज्ञतासिद्धौ सर्वनिर्णयमुक्तवान्।
आदिमध्यावसानेषु मुख्यलीलोच्यते हरेः ॥१२॥
हेतूद्यमफलैर्द्वेधा समग्रा न स्वतःफलाः।
अतस्तु प्रथमेऽध्याये लीला भगवतोच्यते ॥१३॥
हेतुरूपा ससामान्या प्रश्नः पूर्वविनिश्चितः ॥१४॥

इति श्रीवल्लभाचार्यविरचिता एकादशस्कंधार्थनिरूपण-
कारिकाः समाप्ता।

# अथ श्रीकृष्णप्रेमामृतम्।

श्रीकृष्णाय नमः।

एकदा कृष्णविरहाद्ध्यायंती प्रियसंगमम्।
मनोबाष्पनिरासाय[1] जल्पंतीदं मुहुर्मुहुः ॥ १ ॥
कृष्णः कृष्णेंदुरानंदो गोविंदो गोकुलोत्सवः।
गोपालो गोपगोपीशो बल्लवेंद्रो व्रजेश्वरः ॥ २ ॥

१ मनोव्यथा निरा. पा० इति मम प्रतिभाति.

प्रत्यहं नूतनतरस्तरुणानंदविग्रहः।
आनंदैकसुखस्वामी संतोषाक्षयकोशभूः ॥ ३ ॥
आभीराभिनवानंदः परमानंदकंदलः।
वृंदावनकलानाथो व्रजानंगनवांकुरः ॥ ४ ॥
नयनानंदकुसुमो व्रजभाग्यफलोदयः।
प्रतिक्षणातिसुखदो मोहनो मधुरद्युतिः ॥ ५ ॥
सुधानिर्यासनिचयः सुंदरः शीतलाकृतिः।
नवयौवनसंभिन्नश्यामामृतरसार्णवः ॥ ६ ॥
इंद्रनीलमणिस्वच्छो दलितांजनचिक्कणः।
इंदीवरमुखस्पर्शो नीरदस्निग्धसुंदरः ॥ ७ ॥
कर्पूरागरुकस्तूरीकुंकुमाक्तांगधूसरः।
सुकुंचितकचग्रस्तोल्लसच्चारुशिखंडकः ॥ ८ ॥
मत्तालिविभ्रमत्पारिजातपुष्पावतंसकः।
आननेंदुजितानंतपूर्णशारदचंद्रमाः ॥ ९ ॥
श्रीमल्ललाटपाटीरतिलकालकरंजितः।
लीलोन्नतभ्रूविलासो मदालसविलोचनः ॥१०॥
आकर्णारक्तसौंदर्यलहरीदृष्टिमंथरः।
घूर्ण्यमानस्वनयनः संवीक्षणविचक्षणः ॥११॥
अपांगेरितसौभाग्यतरलीकृतलोचनः।
ईषन्मुद्रितलोलाक्षः सुनासापुटसुंदरः ॥१२॥

गंडप्रांतोल्लसत्कर्णमकराकृतिकुंडलः ।
प्रसन्नानंदवदनो जगदाह्लादकाननः ॥१३॥
सस्मेराधरलावण्यप्रकाशीकृतदिङ्मुखः ।
सिंदूरारुणसुस्निग्धमाणिक्यदशनच्छदः ॥१४॥
पीयूषाधिकमाध्वीकसूक्तश्रुतिरसायनः ।
त्रिभंगललितस्तिर्यग्ग्रीवस्त्रैलोक्यमोहनः ॥१५॥
कुंचिताधरसंसक्तकूजद्वेणुविनोदवान् ।
कंकणांगदकेयूरमुद्रिकाविलसद्भुजः ॥१६॥
स्वर्णसूत्रसुविन्यस्तकौस्तुभामुक्तकंधरः ।
मुक्ताहारलसद्वक्षःस्फुरच्छ्रीवत्सलांछनः ॥१७॥
आपीनहृदयो नीपमाल्यवान्बंधुरोदरः ।
संवीतपीतवसनो रशनाविलसत्कटिः ॥१८॥
अंतरीयपटीबंधप्रपदांदोलितांचलः ।
अरविंदपदद्वंद्वकलक्वणितनूपुरः ॥१९॥
बंधूकारुणमाधुर्यसुकुमारपदांबुजः ।
नखचंद्रजिताशेषदर्पणेषु मणिप्रभः ॥२०॥
ध्वजवज्रांकुशांभोजराजच्चरणपल्लवः ।
त्रैलोक्याद्भुतसौंदर्यपरिपाकमनोहरः ॥ २१ ॥
साक्षात्केलिकलामूर्तिः परिहासरसार्णवः ।
यमुनोपवनश्रेणीविहारी व्रजनागरः ॥२२॥

गोपांगनाजनासक्तो वृंदारण्यपुरंदरः ।
आभीरनागरीप्राणनायकः कामशेखरः ॥२३॥
यमुनानाविको गोपीपारावारकृतोद्यमः ।
राधावरुंधनरतः कदंबवनमंदिरः ॥२४॥
व्रजयोषित्सदाहृद्यो गोपीलोचनतारकः ।
जीवनानंदरसिकः पूर्णानंदकुतूहलः ॥२५॥
गोपिकाकुचकस्तूरीपंकिलः कोकिलालसः ।
अलक्षितकुटीरस्थो राधासर्वस्वसंपुटः ॥२६॥
वल्लवीवदनांभोजमधुपानमधुव्रतः ।
निगूढरसविद्गोपीचित्ताह्लादकलानिधिः ॥२७॥
कालिंदीपुलिनानंदी क्रीडातांडवपंडितः ।
आभीरिकानवानंगरंगभूमिसुधाकरः ॥२८॥
विदग्धगोपवनिताचित्ताकूतविनोदवान् ।
नानोपायनपाणिस्थगोपनारीगणावृतः ॥२९॥
वांछाकल्पतरुः कामकलारसशिरोमणिः ।
कंदर्पकोटिलावण्यः कोटींदुललितद्युतिः ॥३०॥
नवीनमधुरस्नेहः प्रेयसीप्रेमसंचयः ।
गोपीमनोरथाक्रांतो नाट्यलीलाविशारदः ॥३१॥
जगत्त्रयमनोमोहकरो मन्मथमन्मथः ।
गोपसीमंतिनीशश्वद्भावापेक्षापरायणः ॥३२॥

प्रत्यंगरभसावेशप्रमदाप्राणवल्लभः ।
रासोल्लासमदोन्मत्तो राधिकारतिलंपटः ॥३३॥
खेलालीलापरिश्रांतः स्वेदांकुरचिताननः ।
गोपिकांकलसच्छ्रीमान्मलयानिलसेवितः ॥३४॥
इत्येवं प्राणनाथस्य प्रेमामृतरसायनम् ।
यः पठेच्छ्रावयेद्वापि स प्रेम्णि प्रमिलेद्ध्रुवम् ॥३५॥

इति श्रीवल्लभाचार्यविरचितं प्रेमामृतं संपूर्णम् ।

# अथ श्रीनंदकुमाराष्टकम् ।

श्रीकृष्णाय नमः ।

सुंदरगोपालम् उरवनमालं नयनविशालं दुःखहरं ।
वृंदावनचंद्रमानंदकंदं परमानंदं धरणिधरम् ॥
वल्लभघनश्यामं पूर्णकामम् अत्यभिरामं प्रीतिकरं ।
भजनंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्मपरम् ॥१॥

सुंदरवारिजवदनं निर्जितमदनम् आनंदसदनं मुकुटधरं ।
गुंजाकृतिहारं विपिनविहारं परमोदारं चीरहरम् ।
वल्लभपटपीतं कृतउपवीतं करनवनीतं विबुधवरं ।
भज नंदकुमारं सर्वसुखसारं तत्त्वविचारं ब्रह्म परम् ॥२॥

---

१ उरूवन. २ घनशोभंरू. ३ पूर्णमुकामम्. ४ इति पा० ममप्रीतिभाति.